**दिनाङ्कः 04.05.2026**
**प्रातः - 06:55**

# संस्कृत वार्ताः

## अथ वार्ताः

### मतगणना

असम-पश्चिमबङ्गाल-केरलम-तमिलनाडुराज्येषु केन्द्रशासितप्रदेशे पुडुचेरी इत्यत्र विधानसभा-निर्वाचनेभ्यः अद्य मतगणनायै सर्वाः सज्जताः जाताः। मतगणना प्रातः अष्टवादने प्रारप्स्यते। प्रैष्यमतपत्राणां गणना सर्वप्रथमं भविष्यति, तथा वैद्युतिकीमतदान-यन्त्राणां गणना प्रातः सार्ध-अष्टवादने प्रारप्स्यते। असमराज्ये षड्विंशत्यधिकैक-आसनेभ्यः, केरलमराज्ये चत्वारिंशदधिकैक--आसनेभ्यः, तमिलनाडुराज्ये चतुस्त्रिंशदधिक-द्विशत-आसनेभ्यः, तथा पुडुचेरी इत्यत्र त्रिंशत् विधानसभासनेभ्यः मतगणना भविष्यति। पश्चिमबङ्गाले त्रिनवत्यधिक-द्विशत-आसनेभ्यः अद्य मतगणना भविष्यति। फाल्टा-विधानसभायै पुनर्मतदानं मईमासस्य एकविंशतिदिनाङ्के भविष्यति, मतगणना च मईमासस्य चतुर्विंशति-दिनाङ्के भविष्यति।

### पीएम्-मिशन दृष्टि

भारतीयान्तरिक्ष-नवाचारेण गैलेक्सआई इत्यनेन संयुक्तराज्यामेरिकायाः कैलिफोर्निया इत्येतस्मात् स्थलात् स्पेसएक्स इत्येतस्य फाल्कन 9 रॉकेट इत्यनेन विश्वस्य प्रथमः ऑप्टोसार इति उपग्रहस्य, मिशनदृष्टेः प्रक्षेपणं कृतम्। नवत्यधिकैक-किलोग्राममिता मिशनदृष्टिः नैजभारतीय-संस्थाद्वारा निर्मितः बृहत्तमः पृथ्वी-निरीक्षणोपग्रहः अस्ति। उपराष्ट्रपतिः सी. पी. राधाकृष्णन् प्रधानमन्त्री नरेन्द्रमोदी च मिशनदृष्टि-उपग्रहस्य सफलप्रक्षेपणस्य प्रशंसां कृत्वा एतम् उपग्रहं भारतस्य अन्तरिक्षस्य नवान्वेषणस्य च यात्रायां प्रमुखसोपानरूपेण वर्णितवन्तौ।

### विदेश मन्त्रालय

विदेशमन्त्रालयः अवदत् यत् चतुःपञ्चाशदधिक-नवदशशततमाद् वर्षात् कैलाश-मानसरोवर-यात्रायै लिपुलेख इति दीर्घमार्गः अस्ति, एषः नूतनविकासः नास्ति इति। विदेशमन्त्रालयस्य आधिकारिकप्रवक्ता रणधीर-जायसवालः कैलाश-मानसरोवर-यात्रायाः सन्दर्भे सीमाप्रकरणे नेपालस्य विदेशमन्त्रालयद्वारा कृतानां टिप्पणिनां विषये प्रसारमाध्यमानां प्रश्नानाम् उत्तरं दत्तवान्। असौ उक्तवान् यत् चतुःपञ्चाशदधिक-नवदशशततमाद् वर्षात् कैलाश-मानसरोवर-यात्रायै लिपुलेख इति दीर्घमार्गः अस्ति, अनेन मार्गेण यात्रा दशकेभ्यः प्रचलति, अतः एषः नूतनः विकासः नास्ति।

### रक्षामन्त्री

रक्षामन्त्री राजनाथसिंहः अद्य उत्तरप्रदेशस्य प्रयागराजे 'रक्षात्रिवेणी-सङ्गमः - यत्र प्रौद्योगिक्याः उद्योगस्य सैनिकक्षमतायाः सङ्गमः भवति' इत्येतंविषयम् आलक्ष्य उत्तर-प्रौद्योगिकी-सङ्गोष्ठ्याः उद्घाटनं करिष्यति। रक्षामन्त्रालयः संसूचितवान् यत् एतत् सङ्गोष्ठी-परिचालनं सम्बद्ध-आह्वानानां निवारणाय अत्याधुनिक-स्वदेशीय-प्रौद्योगिकीनां प्रदर्शनस्य एकीकरणस्य च सजीव-मञ्चरूपेण कार्यं करिष्यति।

**मेघवाल**

केन्द्रीय-विधि-मन्त्री अर्जुनराम-मेघवालः ह्यः राञ्ची-नगरे उच्चन्यायालयस्य अधिवक्तॄणां सम्मेलने भागम् अगृह्णात् यत्र न्यायव्यवस्थायाः आह्वानानां, परिष्कारस्य, अधिवक्तॄणां च भूमिका चर्चिता। स्वीय सम्बोधने असौ अधिवक्तृभ्यः न्यायव्यवस्थां सुलभतरं सुदृढं च कर्तुं सक्रियभूमिकां निर्वोढुम् आग्रहम् अकरोत्। श्रीमेघवालः 'संसद्-सांस्कृतिक-महोत्सव-सह-स्वदेशी-मेला' इत्यस्य समापन-समारोहे अपि भागम् अगृह्णात्, स्थानीयोत्पादानां प्रचाराय च बलम् अददात्। राञ्ची-नगरस्य प्रवासकाले असौ विभिन्नेषु कार्यक्रमेषु अपि भागम् अगृह्णात्।

**आईपीएल**

आईपीएल-इति क्रिकेट्-प्रतिस्पर्धायां ह्यः रात्रौ अहमदाबादस्य नरेन्द्रमोदीक्रीडाङ्गणे गुजरात-टाइटन्सदलेन पञ्जाबकिङ्ग्स्-दलं चतुर्-स्तोभैः पराजितम्। अद्य मुम्बय्याः वानखेडेक्रीडाङ्गणे मुम्बईइण्डियन्स्-दलं लखनऊसुपर-जायण्ट्स्- दलं सम्मुखीकरिष्यति। इयं स्पर्धा सायं सार्धसप्तवादने प्रारप्स्यते।

॥ इति वार्ताः॥